This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

१

श्रीगणेशायनमः॥ ॐ॥ आनंदसिंधुमजमक्षरमद्वितीयमात्मानमच्युतशिवं स्व
गुरुं प्रणम्य कुर्वे समस्तजननिर्वृतिसौख्यसिद्ध्यै श्रीमच्छुकाष्टसरोजविबोध
भानुं १ इहखल्वनेकजन्मसंचितानंतसुकृतपरिपाकवशात् प्रक्षीणसर्वरागा
दिदोषविशुद्धांतःकरणः अनेकजन्मानुष्ठितनित्यनैमित्तिकादिसत्कर्मोपास
नकर्माजितविवेकवैराग्यशमदमादिसाधनसंपन्नो मुमुक्षुर्मोक्षसाधनेतरति
शोकमात्मविदितिश्रुतिबोधितआत्मतत्वज्ञानेसमुदिताभिलाषः प्राक्जन्म
न्यभ्यस्तेष्वपिश्रवणमनननिदिध्यासनेषुबलवत्तरप्रतिबंधात् [illegible] दनुत्पन्नतत्वसा
क्षात्कारसंपरेतः प्राप्यपुण्यकृतांलोकानित्यादिभगवद्दर्शितदिशाशुद्धानांश्री

त

Checked 2012

Acc. NO. ~~3090~~ M-1663
Title - टी. :- शुकाष्टक व्याख्यान (मूलसहित)
Author - टी. :- गंगाधरेन्द्र सरस्वती.
Date - ?
Subject - वेदान्त, स्तोत्र.
folio - 13
Xerox - 24.

KKSU LIBRARY
RAMTEK
441 106
M-1663
Dist. Nagpur

मतांज्ञानविज्ञानयोगैश्वर्येसंपन्नानांवासिष्ठानांकुलेसाक्षाद्भगवतोहरेर्ज्ञानश
क्त्यवतारेणभगवताबादरायणेनतपोध्यानसमर्हणैःप्रसादितस्यभगवतोमहे
श्वरस्यवरप्रभावात्पुत्रत्वेनावतीर्णैःश्रीमच्छुकाचार्यैःपूर्वाभ्यस्ततत्वबोध
स्यप्रतिबंधक्षयेस्वतएवोन्मेषात्पितुरुपदेशाज्जनकोपदेशसंवादिस्वानुभवा
त्स्वकरतलामलकवदपरोक्षीकृतात्मतत्वः कृतार्थतमः कृतकार्येविधिनिषेध
शास्त्रेपुनःप्रवृत्तोप्रयोजनाभावादेवत्यक्तसर्वकर्माप्रव्रजिष्यन्स्व[illegible]निश्चया
नभिज्ञैःसुहृद्भिःकर्मठैर्विधिनिषेधविषयप्रवृत्तिनिरस्तैरनुनीयनिबध्यमानस्ते
षामन्येषांचविवेकोदयायतत्वविदांविधिकैंकर्यविधूरतांज्ञानप्रभाववर्णनमु

2

२

स्वेनदर्शयनस्त्वावधारितमात्मतत्वमुपदिशन्ति भेदाऽभेदावित्यादिनात्रिभिः भेदा
भेदौसपदिगलितौपुण्यपापेविशीर्णेमायामोहौक्षयमधिगतौनष्टसंदेहवृ
तेः शब्दातीतंत्रिगुणरहितंप्राप्यतत्वावबोधान्निस्त्रैगुण्यपथिविचरतःकोवि
धिःकोनिषेधः १ सत्वरजस्तमःसंज्ञैर्गुणैरहितंत्रिगुणात्मिकयासकार्ययाविद्या
शक्त्यारहितमितियावत् अतएवशब्देभ्योलौकिकेभ्योवैदिकेभ्यश्चातीतंअ
तिक्रांतंतदविषयमित्यर्थः पंचविधाहिशब्दाः जातिवचनाःगुणवचनाः
क्रियावचनाःसंज्ञाभूताःसंबंधिनश्चेति यथागौःशुक्लाधावतिभद्र
कोभारवाहइतिजात्यादयश्चत्रैगुण्यविषयएवप्रसिद्धाननिस्त्रैगुण्यइतिश

3

प्र

द्वयरत्तिनिमित्ताभावाच्छुद्धातीतंतथाविधंतत्त्वावबोधंतत्त्वमबाधितंवस्तुतद्रूपंअ
वगतोबाधोवबोधस्तंसाक्षात्कारवृत्तिः स्वैकाशपूर्णसच्चिदानंदैकरसंभूमाख्यं
वस्तुप्राप्यविस्मृतकंठगतचामीकरन्यायेनबोधमात्रेणलब्ध्वानष्टसंदेहरूरेतः सर्व
संदेहबीजभूताज्ञाननाशादेवनष्टाशेषानिष्टसाधनहेयोपादेयगोचरसंदेहरूरेत्तयोय
स्य अतएवातिस्त्रैगुण्येनिर्गतास्त्रैगुण्यास्तामसाविषयिणोराजसाःकर्मिणःसात्त्वि
काउपासकास्त्रयस्मात्तथाविधंनिर्विकल्पपरमसमाधिरूपेसप्तमयोगभूमिकाल
क्षणेपथिविचरतःस्वच्छंदंविहरतोममकोविधिःपुनरग्निहोत्रादिकर्मसुप्रवर्त्तयेत्को
वानिषेधोनैष्कर्म्यस्वरूपावस्थितंनिवर्त्तयेत्नकश्चिदपिसमर्थइत्यर्थः यद्वित्रै

२ गुणपपञ्चिकाः देहाद्यहंभावाः पुण्यफलरागिणः पापफलभीरवः साध्यसाधनेतिक
र्तव्यताभेददर्शिनः कर्तृभोक्तृस्वभावमात्मानं मन्यमानाः पूर्णं सच्चिदानंदाद्वयब्रह्मा
त्मभावादर्शिनस्तान्हीष्टानिष्टफलकीर्तनेन रागभयोद्दीपनपुरःसरं तत्साधनप्र
वृत्तये निवृत्तये वा विधिनिषेधावशीकुर्यात्तान्न तु मां यतां मम तद्वैत्   भेदाभेदौ
भेदश्चाऽभेदश्च भेदाभेदौ प्रतिदेहमौदयकल्पितश्चात्मभेदः भिन्नस्यैतस्य देहादेस्ता
दात्माध्यासलक्षणोऽभेदश्च तौ हि रागद्वेषाभिमानादिद्वारा सर्वानर्थहेतू तौ सपदि
तत्वसाक्षात्कारसमकालमवगलितौ यावद्विभेददर्शनं तावदेव भयारति रागद्वे
षादयः द्वितीयाद्वै भयं भवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति अथ

योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानां सवैनैव रेमे स
द्वितीयमैच्छत् सोकामयत बहुस्यां प्रजायेय तज्जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्या
दथ कर्म कुर्वीयेत्येतावान्वै काम इत्यादिश्रुतिभ्यः एवं देहाद्यभिमानात्मदर्शनमप्यनर्थहे
तुः अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इत्यादिस्मृतु वचनात् स्मृ
तिरपि देहाभिमानाद्यत्पापं न तत्गोवधकोटिभिः प्रायश्चित्ताद्वैवछुद्धिरेषां गोवधका
रिणां देहाभिमानिनां पुंसां प्रायश्चित्तं न विद्यत इति अत एव हि पुण्यपापे पुण्यं धर्मा
नुष्ठानजन्यमपूर्वं पापमधर्मानुष्ठानजन्यमपूर्वं तेपि विशीर्णे शिलाप्रहतलोष्टपा
सवद्वविध्वस्ते तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति सूत्रवच

४

नात्र तद्वेयथ्योक्तातूलमग्नो भ्रांतं प्रदृश्यते स्यादि स्मृतेस्मत तत्कृतः यतो मायामोहोस्य मुपगतो मोहः अद्वितीयपूर्णसच्चिदानंदब्रह्मात्मस्वरूपतिरोधायकावरणशक्तिप्रधानाऽविद्यानाम्ना तु आरतस्य तस्यैवान्यथाप्रतिभासनिमित्तविक्षेप शक्तिप्रधाना साएकस्या एवाविद्यायास्तमोगुणप्रधानांश आवरकत्वान्मोह इति उच्यते रजोगुणप्रधानस्तु विक्षेपहेतुत्वान्मायेति तौ मायामोहौ सत्वोत्कर्षप्रयुक्तशमदमादिसंपत्तिपूर्वकेणाऽत्मतत्वसाक्षात्कारेण क्षयं सहकार्येणास्तंतिकं बाधमुपगतौ प्राप्तौ तथाच विधिनिषेधशास्त्रयोः सर्वप्रमाणप्रमेयव्यवहारस्याविद्यावद्विषयत्वान्निरस्ताविद्यस्य पूर्णानंदाद्वितीयब्रह्मभूतस्य मम न विधिनिषेधशास्त्रविषयत्वमित्येतसिद्धमि

7

त्तिभावः १ आत्मतत्वज्ञानेनविधिनिषेधगोचरप्रवृत्तिनिवृत्तिविषयसाध्यसाधनेतिक
र्तव्यतादिसर्वद्वैतोमहोद्धारास्वस्वविधिनिषेधानाक्रमणीयत्वमित्याह॥ ॥ यद्वेति
यद्वात्मानंसकलवपुषामेकमंतर्वहिस्थंदृष्ट्वापूर्णंखमिवसततंसर्वभांडस्थमेकं नान्यत्का
र्यंकिमपिचततःकारणाद्भिन्नरूपंनिस्त्रैगुण्येपथिविचरतःकोविधिःकोनिषेधः २
यद्वेति प्रकारांतरेणोक्तार्थोपपत्तिद्योतनार्थंननुभेदाभेदयोर्बोधमात्रात्कथंनिवृत्तिः
तत्वज्ञानस्यसत्यार्थेनिवर्तनासामर्थ्यात् नहिबोधमात्राद्वस्तुतोभिन्नोप्यभिन्नत्वमाप
द्यते भेदश्चप्रतिशरीरमात्मनांसुखदुःखव्यवहारव्यवस्थादर्शनात्कुतःशास्त्रतश्चस लो
त्वावगम्यते ऐकात्म्येहिएकस्यसुखदुःखेवासर्वेसुखिनोदुःखिनोवास्युः तथाचभग

वनागौतमेनाप्युक्तं नानात्मनोव्यवस्थातइतिलौकिकवैदिकादिव्यवहारव्यवस्थानैकात्म्ये
५ नोपपद्यते नहिमित्राशुदासीनमध्यस्थादिगोचरोरागद्वेषोपेक्षादिप्रयुक्तोलोकसंमता
व्यवहारपरदारपर द्रव्यपरद्रोहादिवर्जनविषयआचार्यपितृवृद्धाद्यनुगमनपूजनादि
विषयश्चोतस्मात्तेष्वव्यवहारोव्यवस्थितउपपद्यते तस्मान्नानात्मैवेत्याशंकामपाकु
र्वन्नाह सकलवपुषामेकमिति सकलवपुषांजरायुजांडजस्वेदजोद्भिज्जाप्यतैजसवायव्य
मानसप्रभेदादष्टधाभिन्नानांशरीराणामंतर्वहिःस्थमेकमभिन्नमित्यर्थः अयंभावः नतावद्भे
दोदेः सत्यताप्रमाणावेद्यत्वेसतिवेद्यत्वात्शुक्तिरूप्यादिवत् यथाचभेदस्यप्रमाणा
वेद्यत्वंतथोपपादितमस्माभिःस्वाराज्यसिद्धौएवमात्मनोपरस्परविभिन्नत्वेदेहेंद्रिया

दितादात्म्यलक्षणोऽभेदोऽपि न प्रमाणावेद्यः स्वात्मनि नानात्वानुभावात् देहादीनां च ना
नात्वात् बाल्याद्यवस्थाभेदेनाध्यबाधियोदिना चेदेहेंद्रियादेर्व्यभिचारेप्यात्मन्यबाधि
तप्रत्यभिज्ञेयैकत्वनिश्चयेन तैः सर्वैस्तस्याभेदायोगात्॥ एकैकतादात्म्यविनिगमन
विरहादतिरिक्तत्वसिद्धेरिति ननु कथं सकलवपुषामेक आत्मा स हि वालाग्रशतभा
गस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः एषोऽणुरात्मा चेतसा वेदितव्य इत्या
दिश्रुतिभिरणुतरनाडीछिद्रोपसर्पणलिंगैश्चाणुपरिमाणो विज्ञायेयदि च सर्वांगी[illegible]ते
णोत्याद्युपलंभात् समः प्लुषिणा समो नागेन समो मशकेनेत्यादिश्रुत्या च देहपरि
माणोऽप्युपगम्यते तथापि देहद्वयांतरालविच्छिन्नवृत्तिर्न सकलवपुषामेकः स इत्याशं

स्याद् अंतर्बहिस्तुमिति दृलस्यांतर्वहिश्वस्थितं विभुमित्यर्थः नित्यं विभुं सर्वगतं सु
सूक्ष्मं आत्मैवाधस्तादात्मैवोपरिष्टाद्ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्दक्षिणत
श्चोत्तरेणेत्यादिश्रुतेः॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवमित्यादिस्मृतेरेका
त्मश्रुतिलिंगाच्चात्मनोपरिछिन्नत्वसिद्धिरितिभावः अणुपरिमाणत्वाभिप्रा
यान्नाणुरात्मेतिश्रुतिः आकाशवत्सौक्ष्म्यादुर्लक्ष्यत्वाभिप्रायावालाग्रेत्यादि
श्रुतिरपिवाक्यशेषानुरोधाच्छ्रुत्यंतरानुरोधाच्चोपाधिकपरिछेदानुवादिनीति
तद्गुणसारत्वात्तुतद्व्यपदेशः प्राज्ञवदितिसूत्रेवादरायणाभिर्व्यवस्था पिता औ
पाधिकविछेदानुवादिनीतिस्यादेवविछेदप्रत्ययोप्युपपन्नइतिनवास्तवात्मे

विरोधः

क्पस्यैशास्त्रीयोप्यात्मभेदव्यवहारार्थेक्रियादिभेदोंतःकरणाद्युपाधिभिरेवोपपादनीयः
यथैकस्याकाशस्यसूचिपाशकुंभकुसूलाद्युपाधिभेदाद्वसीवनवंधनजलाहरण
धान्यावपनाद्यर्थेक्रियाणामसंकरस्तत्कर्णशष्कुल्यवछेदभेदाछ्रोत्रनानात्वादिव्य
वस्थावतद्व्यवस्थोपपत्तेरित्याशयेनदृष्टांतमाह खमिवेति एतेनैकस्यदुखेसर्वेषांत
त्संसर्गोपिनिरस्तइतिनानात्मानोव्यवस्थातइतिहेतुरप्रयोजकः नन्वेवंसत्सोपाधिक
मेवभेदमालंब्यज्ञानिनामपिश्रौतस्मार्त्तविधिनिषेधाधिकारः किंन्नस्यादितिचेन्नभ
वेदेवंयदितेषामज्ञानिनामिवोपाधिस्ततादात्म्यसंसर्गाध्यारोपोनबाधितोस्यात्तान
त्वेवंयतस्तेषांकारणाद्भिन्नरूपंभेदकोपाध्यात्मनोन्यन्नास्ति अथातआदेशोनेति

७

नेतिवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतिशतैःकारणाद्भिन्नस्यका
र्यस्यप्रतिषिद्धत्वेनमिथ्यात्वात् तत्वसाक्षात्कारेणाध्वसमूलंउपमर्द्दितत्वादिति २ एवं
जीवस्यतत्वतोविमर्शैः ज्ञाना पाद्यतीतापेतब्रह्मक्षत्रादिभेदैर्निरतिशयानंदैकरसब्रह्म
मात्रैकरसत्वादपिस्वस्यनकर्मोधिकारइतिदर्शयितुंतत्वमस्यादिवाक्यतात्पर्यरहस्यमु
द्घाटयतिहेम्नइति॥ ॥हेम्नःकार्यंहुतवहगतंहेममात्रंवेतियद्वत्क्षीरेक्षीरंसमरसतया
तोयमेवांबुमध्ये एवंसर्वेसमरसतयात्वंपदेतत्पदार्थेनिस्त्रैगुण्येपथिविचरतःकोविधिः
कोनिषेधः २ यथाहेम्नःसुवर्णस्यकार्यंकटकमुकुटकुंडलग्रैवेयकांगुलीयकादिहुतव
हेअग्नौगतंध्मायमानंद्रवीभूतंसमरसतयाएकीभूतंकटककुंडलादिनामरूपभेदंजगत्

13

नष्टयः कटककुंडलाद्यर्थक्रियासमर्थं किंतु हेमं सर्वं हेमसंबंधिसामान्यस्वभावमेव यद्भवति यथा वा क्षीरे निषिक्तं क्षीरमविभक्तं क्षीरसामान्यमेव भवति यथा अंबुमध्ये निषिक्तं तोयं जलं तोयसामान्यमेव समरसतयाऽकरस्येन भवति एवं सर्वं वियदादिभुवनांतं सर्वं तत्पदं तत्पदवाच्यार्थभूतं जगतदनन्यत्वमारंभणशब्दादिभ्य इति श्रुतिसूत्रोपदर्शितसत्यपरं परावधिपरमार्थसन्मात्रैकरूपपरिशेषात् समरसतया तदेकरसतया अपरिच्छिन्नसच्चिन्मात्रात्मना प्रविलापनेन यदा संपन्नं तदा त्वंपदवाच्यमपि जीवरूपं तत्पदार्थे तत्पदलक्ष्ये प्रागुक्ते समरसतया पूर्णानंदभूमात्मनैव संपन्नं तथाविधप्रत्यक्चिन्मात्रात्मके निस्त्रैगुण्ये परमात्मस्वभावे पथि विचरतो मम विधिनिषेधफलप्रदेश्वरादेः पृथगशेषादपि न विधि

८

निषेधशास्त्राधिकारइत्यर्थः ३ उक्तमेवार्थंपुनर्दृष्टांतांतरैरपिविशदयन्तादृशम्भूमानंदस्वरू
पप्रतिपक्षस्यस्वस्यनकर्माधिकारप्रसक्तिरित्याह यस्मिन्निति यस्मिन्विश्वंसकलभुवनंसामर
स्यैकभूतमूर्वीद्यापानलमनिलखंजीवमेवंक्रमेण यत्क्षाराब्धौसमरसतयासैंधवैकत्वन्
तंनिस्त्रैगुण्यपथिविचरतःकोविधिः ४ यस्मिन्पूर्णात्मनिसकलंसमस्तंकलाभिःसावय
वपदेशाभेदैःसहितंभुवनंभूर्भुवस्वरितित्रिधासप्तधाचतुर्दशधावाभिन्नंब्रह्मांडोदरकोष्ठ
प्रभेदरूपंलोकजातंतथाउर्वीपृथिवीआपःअनलंअग्निःछांदसात्क्लीबत्वंअनिलोवायुःखं
आकाशंजीवयतीतिजीवंस्थूलसूक्ष्मदेहद्वयमित्येवंक्रमेणाधिलोकमधिभूतमध्यात्मंचेति
त्रिधाभिन्नंविश्वंकृत्स्नंजगत्यातीतियत्विलयंप्राप्नुवत्सत्क्षाराब्धौप्रक्षिप्तसैंधवमिवस

15

समरसतयाऽएकरसेनैकत्वभूतमेकत्वंप्राप्तंतस्मिन्निस्त्रैगुण्येपथीत्यादिपूर्ववत्तक्षाराब्धौसैंधवै
कत्वंतमितिसापेक्षत्वादसमर्थस्यसैंधवपदस्यसमासश्छांदसः ४ उपाधीनांप्रविलयेन
सामरस्येउपहितस्यनपृथगवशेषोस्तीतिजीवस्याखंडब्रह्मात्मताअर्थात्सिद्धैवेतिनतत्र
प्राग्दृष्टांतोदर्शितः इदानींतुतत्रापियथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहा
य तथाविद्वान्नामरूपाद्विमुक्तोनिरंजनःपरमंसाम्यमुपैतीतिश्रुतिसिद्धंदृष्टांतंदर्शयन्सर्वभे
दप्रत्यस्तमिताद्वितीयब्रह्मैकरसस्यास्याद्विधिनिषेधशास्त्राधिकारप्रसक्तिरेवस्वस्यनास्तीत्याह
यद्वदिति यद्वन्नद्योदधिसमरसोसागरत्वमवाप्नोतितद्वज्जीवालयपरिगतोसामरस्यैकभूताः भे
दातीतंलयपरिगतेसच्चिदानंदरूपेनिस्त्रैगुण्येपथिविचरतांकोविधिःकोनिषेधः ५ नद्यान

दीद्वारा आउदधि औदधिसमुद्रपर्यंतं कालभेदेन प्राप्तौ समौ रसौ जलप्रवाहौ परस्परमेलनेन सा
गरत्वमेव अवाप्नोतीत्यवधारणेन प्रसिद्धौ च आत औगौ ओमाङोश्चेति पररूपविषये उदधि
क्लंद्रादृशी अथवा उदधिना समरसस्यायं औदधिसमरसः प्रवाहः नदी च औदधिसमरसश्च
नद्यौदधिसमरसौ न नद्योदधिसमयोः रसौ जले मेलनेन सागरत्वमेकरूपं यद्वद्वाप्नावित्यर्थः
यथायं दृष्टांतस्तद्वज्जीवब्रह्म आलीयते अस्मिन्नुपाधिमात्रमित्यालयं ब्रह्म तयोः परिगतो उ
पाधिविलयादैक्ये सति सामरस्येन एकभूताः अखंडस्वभावेन स्थिताः अवच्छेदभेदवद्विव
भेदस्याप्युपाधिकृतत्वात् तत्परित्यागतः स्वस्थान एव विस्मृतकंठचामीकरवदधिगतं सत्स
वैभेदातीतं सच्चिदानंदैकरूपं स्वात्मानं प्राप्तस्य निस्त्रैगुण्यपद इत्यादि भाग्वत् नद्यौ बुद्धिसमरसोऽ

तिपाठस्तुस्पष्टः किंच त्वंपदार्थस्य तत्पदलक्ष्यसन्मात्रतावधारणात्तत्पदार्थस्य च त्वंपदलक्ष्यस्व
प्रकाशप्रत्यक्मात्रत्वावधारणादुभयैक्येन पूर्णानंदमात्रपरिशेषान्न पुनर्विधिनिषेधावसरताप्रा
तिरित्याह ॥ द्रष्टेति द्रष्टा वेद्यं परमथ पदं स्वात्मबोधस्वरूपं बुध्वात्मानं सकलवपुषामेकमतर्वहिस्थं
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥
वेद्यं संन्यासेन सर्वस्वमपि विहाय महाप्रयत्नेन अवश्यंवेदनीयं परं पदं वस्तु स्वात्मबोधमात्र
स्वरूपं आत्मानं प्रतीचं च सकलवपुषामतर्वहिस्थमेकमद्वितीयसन्मात्रं बुध्वा सदैकरस्येन स्व
दुदिततया स्वप्रकाशपूर्णानंदस्वरूपोभूत्वा निस्त्रैगुण्ये इत्यादि प्राग्वत् ॥ किंच कार्येति सति का
र्येतद्भागात्तदर्थे प्रवृत्तौ कर्ता स्यात्तत्स्वभावश्च विधिशास्त्रे अधिक्रियेत सत्यकार्यैपायेतस्क

18

लेहेषातेतातिवर्त्तमानस्तत्कर्त्ता सन्ननिषेधशास्त्राधिकारीस्यावर्त्ततुकार्याकार्येकिंपितुछो।।
कार्याकार्येकिमपिसततंनैवकर्तृत्वमस्तिजीवन्मुक्तस्थितिरवगतादग्धवस्त्रावभासः एवंदेहे
प्रविलयगतेतिष्ठमानोविमुक्तोनिस्त्रैगुण्येपथिविचरतः कोविधिः कोनिषेधः ७ एवंचसतिसततंतस्यदे
वप्रागिदानीमग्नेचनैवकर्तृत्वमस्तियदिनास्तितर्हिजीवनार्थंभिक्षाटनादौततोपदेशेसमाध्यादौ
चकथंव्यवहरसीतिचेत्तत्राह जीवन्मुक्तेति अतोहंदग्धवस्त्रसंस्काराद्वस्त्राकारमिवपूर्वसंस्कारवा
निवावभासेइतिदग्धवस्त्रावभासः वस्तुतस्तुजीवन्नेवन्नेवमुक्तिस्थितिः एवमुक्तरीत्याज्ञानाग्नि
दग्धत्वाद्देहेभस्मीभूतपरवत्स्वविलयगतेतिष्ठमानोप्यहंविमुक्तएव अतोनिस्त्रैगुण्यपथइत्यादिप्रा
ग्वत् ७ किंचयावल्लविमर्शपतेतावद्देवद्वैतंसदिवभासतेविमर्शोतुनाभ्यंतरस्यवाह्यस्यवा दे

तस्यस्वरूपंकदाचित्केनचिदपिनिरूपयितुंशक्यं इतिदर्शयति कस्मादिति कस्मात्कोहंकि
मपिचभवान्कोयमन्तःप्रपंचः। स्वंस्वेवेद्यंगगनसदृशंपूर्णतत्वप्रकाशं आनंदाख्येसमर
सघनेऽवाङ्मंतर्विहीनेनिस्त्रैगुण्येपथिविचरतःको॰ को॰ ८ अहमितिपरिछिन्नमहंकारा
त्मकंयदाआत्मस्वरूपंभातितत्कस्मात्कुतश्चित्कारणतःस्वरूपतस्तद्दुर्निरूप्यमित्यर्थः
तथाहितद्धागंतुकंनित्यंवाआद्येकस्मादुपादानात्तदागनतावेंवृज्जडतः चेतनात्मरूप
त्वानुभवविरोधाज्जडस्यचेतनोपादानत्वायोगात्नापिचितःचितेरपरिणामस्वभावत्वात्
परिणामायोगात् यदिविवर्त्ततांवें॰ ब्रूषेतर्हि तस्यमृषात्वमेवस्यात् ।नित्यत्वेकामादि
परिणामविरोधःतथाकोहंकोहैंकौहंकोयमहंकारात्मेत्यर्थः नतावज्जडः आत्मतत्वानु

११

भवविरोधात् नापि चित्परिच्छेदविषयत्वानुभवविरोधात् जडदेहादिपक्षपातविरोधाच्च त
स्मादहंकारात्माद्वैचएवेत्यर्थः किंच भवान् त्वमपि किं अनात्मवस्त्वात्मवस्तु वा आद्ये चेत
न तत्वविरोधो द्वितीये ममेति परात्मानुभःवविरोधः अत्र अनयोरावयोः प्रतीयमानः प्रप
चश्चकः किं स्वतः सिद्ध उत परतः आद्ये जाड्यानुभवविरोधः आत्मवत् चिद्रूपत्वापत्तेर्भेदकरूपां
तरापरिशेषादखंडपूर्णचिन्मात्रैकरस्यप्रसंगश्च द्वितीयेपि सपरः केन सिद्धः किं परतः स्वतो
वा आद्य अनवस्थापत्तिः द्वितीये स्वप्रकाशस्य तस्य परसाधकता तत्संवंधाद्वाच्यास संवंधः
किं तादात्म्यमुत संयोगः नाद्यः चिज्जडयोरैक्यघटिततादात्म्यायोगात् नापि द्वितीयः
अक्रियाया निरवयवायाश्च चितः संयोगायोगात् समवायाभ्युपगमे चानवस्था

ध्यापत्तेरच्युतसिद्धदर्शनाच्चएवंचस्वेआत्मरूपंस्वंस्वात्मैकनिष्ठेनस्वासंबंधंपरंसाधयितुंश
क्नोतीतिवेद्यंजगद्रूपंगगनसदृशंशून्यमेववेदितुंनशक्यंगगनमपिनशून्यमप्रामाण्यप्रसंगा
त्तर्हिपूर्णीयत्तत्वंअबोधितसन्मात्रंसएवस्वात्मप्रकाशोयस्यतथाविधमपरिछिन्नंस्वप्रकाशचि
न्मात्रमित्यर्थः तत्त्वतः यतः इदंवेद्यजातंअंतःस्वातिरिक्तवस्तुविहीनेअतएवसमरसघनेसैंध
वघनवत्ज्ञानैकरसघनेभूमानंदाख्येअबाह्यंवहिरनवस्थितंअतस्तादृशेनिस्त्रैगुण्येनित्यमु
क्तात्मैकस्वभावेपर्यविचरतोममअन्यस्यवासर्वथापिनविधिनिषेधघटितकर्माधिकारःको
पिसंपादयितुंशक्यइतिपूर्ववत् ८ इदानींसर्वोपकारायस्वोपादिष्टशास्त्राभ्यासस्यापिमहा
फलताप्रदर्शनमुखेनतदर्थानुसंधानस्यमोक्षफलतांदर्शयति सत्यमिति सत्यंसत्यंपरममन्र

१२

तं सर्वकल्याणरूपं मायारण्ये दहनमलिने शांतिवीरादीपं तेजोरूपं निगमसदनं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गं १ इति श्रीशुकाष्टकस्तोत्रं संपूर्णम् ॥ ॐ इदं व्यास
सपुत्रस्य वाक्यामृतरूपमष्टकमेव परमामृतसाधनत्वात् परममृतं सर्वेषां प्राणिनां कल्या
णरूपं अध्यात्मिकादितापत्रयदहनैः सदा दह्यमानत्वेपि मोहध्वांतपिहितत्वान्मलिनं ज्ञ
गन्मायालक्षणेऽरण्ये मायाध्वांतस्य तापत्रयानलानां च शांत्या प्रशमनेन निर्वाणस्य मोक्ष
सुखस्य स्वप्रकाशकत्वाद्दीपभूतं निगमा वेदांताः सदनं प्रकाश्यगृहं यस्य तथाविधं यत्तेजः प्र
भास्थानीयोर्थप्रकाशस्तेन भूतं प्रभूतं इदृशं व्यासपुत्राष्टकमिदं यः पुरुष अर्थानुसंधान
पूर्वेण मनसा प्रातःकाले पठति स तस्यानुग्रहात् क्रमात् ज्ञानं प्राप्य निस्त्रैगुण्ये उक्त निर्वाण

23

मार्गेवश्यंयातिमुच्यतइत्यर्थः ९ श्रीमद्गुर्वष्टकस्येयंव्याख्याबुद्धिसरोरुहं भानुप्रभेवसु
१३ वनंप्रबोधयतुसन्मतेः॥३॥९ इतिश्रीमत्परमहंसपरिव्राजकाचार्यरामचंद्रसरस्वतीपू
ज्यपादशिष्यगंगाधरेंद्रसरस्वत्याख्याभिक्षुणाविरचितागुर्वष्टकव्याख्यानंसंपूर्णम्

K S U LIBRARY
RAMTEK
M-1663
Dist. Nagpur

```
[OrderDescription]
,CREATED=21.10.20 17:02
,TRANSFERRED=2020/10/21 at 17:06:13
,PAGES=24
,TYPE=STD
,NAME=S0004334
,Book Name=M-1663-T. SHUKASTAK VYAKHYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,
```